राष्ट्रियसंस्कृतविश्वविद्यालयः ,तिरुपतिः, आ.प्र.
**National Sanskrit University:Tirupati ,A.P.**
*(A Central University Established By An Act of Parliament)*

डा.एम्.जि. नन्दन रावः
संयोजकः

डा.एम्. दत्तात्रेय शर्मा
सहसंयोजकः

# वाग्वर्धिनीपरिषद्

।।वाक्पतङ्गाय धीयते ।। युवा स्यात्साधु युवाध्यायकः।।

To,

...............................................

...............................................

...............................................

...............................................

**विषय:- द्वितीयः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः- 2024 - आमन्त्रणम् ।**

मान्याः !

पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन प्रसिद्धेन तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन शास्त्राणां संरक्षणाय संवर्द्धनाय च अविच्छिन्नरूपेणाधुनिके जगति सततं प्रयासो विधीयते।

अखिलभारतस्तरे विश्वविद्यालयोऽयं संस्कृतशिक्षायाः प्रमुखसंस्थात्वेन बहुकालात् प्रसिद्धः सन् प्रमाणयति यत् शिक्षायाः लक्ष्यं न केवलं छात्राणां ज्ञानसंवर्द्धनम्, अपि तु तेषामन्तर्निहितप्रतिभाप्रकाशनेन सर्वाङ्गीणविकाससाधनमिति। तदर्थमेव राष्ट्रियसंस्कृतविश्वविद्यालयेऽस्मिन् छात्रप्रतिभाऽन्वेषणाय प्रतिवर्षं विविधाः शैक्षिक-सांस्कृतिक-क्रीडादिस्पर्धाः समायोज्यन्ते। तदङ्गत्वेन संस्कृतच्छात्रेषु उत्साहसंवर्द्धनाय विश्वविद्यालयोऽयं 2007 संवत्सरादारभ्य नियमितरूपेण दिनचतुष्टयात्मकम् अखिलभारतीयसंस्कृतच्छात्र-प्रातिभसमारोहं सफलतया समायोजयति। ऐषमोऽपि विद्यार्थिविकासयोजनान्तर्गतत्वेन विश्वविद्यालयीयवाग्वर्धिनीपरिषदा द्वितीयः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः अखिलभारतस्तरे 28-03-2024 दिनाङ्कतः 31-03-2024 दिनाङ्कपर्यन्तं समायोक्ष्यते।

तत्र भवन्तो भवन्तः समारोहेऽस्मिन् विविधस्पर्धासु भागं ग्रहीतुं भवत्संस्थातः छात्रान् कृपया प्रेषयन्त्विति सम्प्रार्थना।



19/2/24

## समारोहस्य सम्पूर्णविवरणी अधोलिखिता वर्तते

समारोहस्यास्य सन्त्यधोलिखितान्युद्देश्यानि-

१. संस्कृतच्छात्राणां शैक्षिकसांस्कृतिककौशलविकासाय समुचितावसरप्रदानम्।

२. विभिन्नसंस्कृतसंस्थानां संस्कृतच्छात्राणां मध्ये सौहार्दस्य द्रढीकरणम्।

३. संस्कृतच्छात्रेषु शैक्षिकसांस्कृतिकस्पर्धायामुत्साहसंवर्द्धनम्।

४.अखिलभारते विभिन्नस्थलेषु विद्यमानानां संस्कृतसंस्थानां छात्राणाञ्च आत्ममूल्याङ्कनाय स्वप्रतिभागवेषणाय चावकाशप्रदानम्।

५. संस्कृतच्छात्राणां वक्तृत्व-सांस्कृतिक-वादविवाद-क्रीडा-योगादिकौशलानां संवर्द्धनाय प्रेरणाप्रदानञ्च। अनेन ते आत्मनः सन्तुलितव्यक्तित्वविकासेनभारतस्य दायित्वसंपन्ननागरिकाः भवेयुः।

## समारोहे आयोज्यमानाः स्पर्धाः

### (क) शैक्षिकस्पर्धाः

**(१) शास्त्रभाषणस्पर्धा :**

अधोनिर्दिष्टेषु शास्त्रेषु भाषणस्पर्धा :

(अ) वेदभाष्ये

(आ)साहित्ये

(इ) व्याकरणे

(ई) न्यायवैशेषिकयोः

(उ) साङ्ख्ययोगयोः

(ऊ)पूर्वमीमांसायाम्

(ऋ) वेदान्ते

(ॠ)धर्मशास्त्रे

(ए) ज्यौतिषे

(ऐ) पुराणेतिहासयोश्च

(ओ)आगमे

**(२) अन्त्याक्षरी ।**

**(३) समस्यापूर्ति :**

**(४) रसप्रश्नाः**

### (ख) सांस्कृतिकस्पर्धाः

(अ) संस्कृतगीतगानस्पर्धा (ललितसंगीतम्)

(आ) एकपात्राभिनयस्पर्धा

(इ) एकाङ्किकाभिनयस्पर्धा

(ई) भारतीयजानपदनृत्यस्पर्धा (लोकनृत्यस्पर्धा)

(उ) संस्कृतप्राविधिकस्पर्धा

## (ग) क्रीडास्पर्धाः

**1. युगलबाङ्गिन्टन् स्पर्धाः (Badminton Doubles)**

अ) बालकानाम् एवं बालिकानां कृते पृथक् स्पर्धाः ।

## (घ) योगस्पर्धाः

**1. योगासनानि**

अ) बालकानाम् एवं बालिकानां कृते पृथक् स्पर्धाः ।

## पुरस्काराः

- **वैयक्तिकस्पर्धानां पुरस्काराः -**

प्रथमःपुरस्कारः - स्वर्णपदकं, प्रमाणपत्रं, धनराशिश्च ।
द्वितीयः पुरस्कारः - रजतपदकं, प्रमाणपत्रं, धनराशिश्च ।
तृतीयः पुरस्कारः - कांस्यपदकं, प्रमाणपत्रं, धनराशिश्च ।
सान्त्वनापुरस्कारः - प्रमाणपत्रं, धनराशिश्च ।

- **सामूहिकपुरस्काराः -**

प्रथमः पुरस्कारः - समूहस्य कृते प्रमाणपत्रं, धनराशि :, संस्थायै स्वर्णपदकं च।
द्वितीयः पुरस्कारः - समूहस्य कृते प्रमाणपत्रं, धनराशि :, संस्थायै रजतपदकं च।
तृतीयः पुरस्कारः - समूहस्य कृते प्रमाणपत्रं, धनराशि :, संस्थायै कांस्यपदकं च।
सान्त्वनापुरस्कारः - समूहस्य कृते प्रमाणपत्रं, धनराशिः च।

- **विजयवैजयन्तीपुरस्कारः**

सर्वोच्चाङ्कान् प्राप्तवते संस्कृतानुष्ठानाय विजयवैजयन्ती प्रदीयते। तदर्थमङ्कनिर्धारणमेवं भवति –

| पुरस्कारः | शैक्षिकस्पर्धानाम् | सांस्कृतिकस्पर्धानाम् | क्रीडास्पर्धानाम् | योगासनानि |
|---|---|---|---|---|
| प्रथमः पुरस्कारः | ५ अङ्काः | ५ अङ्काः | ५ अङ्काः | ५ अङ्काः |
| द्वितीयः पुरस्कारः | ३ अङ्काः | ३ अङ्काः | ३ अङ्काः | ३ अङ्काः |
| तृतीय : पुरस्कारः | २ अङ्काः | २ अङ्काः | २ अङ्काः | २ अङ्काः |
| सान्त्वनापुरस्काराः : | १ अङ्क | १ अङ्क | ---- | ---- |

इत्थं प्राप्तान् पुरस्कारानाधृत्य अङ्काः गण्यन्ते।

# परिशिष्टम्

## साधारणनियमाः

1. प्रतिसंस्कृतानुष्ठानमधिकाधिकम् त्रयोविंशतिच्छात्रैः (23) सहितः समूहः प्रेषणीयः। प्रत्येकं भागग्रहणसंस्था केवलमेकं दलं प्रेषयितुं शक्नोति यस्मिन् 15 पञ्चदशच्छात्राः (शैक्षिक-सांस्कृविषप्रतियोगितानां कृते), 04 चत्वारः छात्राः विशेषतया क्रीडाप्रतियोगितानां कृते (द्वौ बालकौ द्वे बालिके च) विशेषतया योगप्रतियोगिता निमित्तं (द्वौ बालकौ द्वे बालिके च) तथा च सम्पूर्णस्य छात्रदलस्य कृते मार्गदर्शकरूपेण केवलमेकः एव अध्यापकः आगन्तुं शक्नोति। बालिकानां सहयोगाय एका महिला मार्गदर्शिका अपि आगन्तुमर्हति।
2. **स्पर्धायां भागग्रहणाय छात्राणां योग्यता :**

(अ) तत्तदनुष्ठानानां नियमिताः (Regular) छात्रा एव भागं ग्रहीतुमर्हन्ति। शास्त्री, B.A(Sans.) एवम् आचार्या, M.A.(Sans) तत्समकक्षाः छात्रा एव भागं ग्रहीतुमर्हन्ति। **शिक्षाशास्त्रि-शिक्षाचार्य-एम्.फिल्-विद्यावारिधिः (B.Ed., M.Ed., M.Phil., Ph.D) छात्राः अस्यां स्पर्धायां भागं ग्रहीतुं नार्हन्ति। दूरशिक्षाकेन्द्रे पञ्जीकृताश्छात्राः (D.D.E.) अप्यत्र भागं ग्रहीतुं नार्हन्ति।**

(आ) प्रतिस्पर्धिषु एकः छात्रः एकस्यैव विश्वविद्यालयस्य प्रतिनिधिर्भवेत्।

(इ) छायाचित्र-कक्ष्यासूचनासहितानि परिचयपत्राणि तत्तदनुष्ठानाधिकारिणां हस्ताक्षराङ्कित्तानि छात्रैरवश्यमानेयानि।

3. **अनुशासनम् (Discipline):**

सर्वैः प्रतिस्पर्धिभिः छात्रैः अनुशासितैः (Disciplined) भाव्यम्। यः कोऽपि अनुशासनहीनः किमपि असामाजिकं कार्यं कुर्वन् लक्षितः चेत् सः स्पर्धायां भागग्रहणाय अनर्हः इति घुष्यते।

1. प्रत्येकं संस्थायाः शैक्षिकस्पर्धायां भागग्राहीसमूहः एव सांस्कृतिकस्पर्धासु भागं ग्रहीतुमर्हति। स च समूहः न्यूनातिन्यूनम् एकस्यां शैक्षिकस्पर्धायामवश्यं भागं गृह्णीयात्।
2. क्रीडास्पर्धायां पृथगेव चत्वारः भागग्राहिणः भवेयुः। क्रीडाभागग्राहिणः अन्यासु स्पर्धासु भागग्रहणं कर्तुं न प्रभवन्ति, केवलं क्रीडास्पर्धास्वेव भागग्रहणं कुर्युः।
3. एकस्यां स्पर्धायां चत्वारः भागग्रहीतारः लभ्यन्ते चेदेव स्पर्धा आयोज्यते।
4. निर्णायकानां निर्णयः एव सर्वमान्यः अन्तिमश्च।

4. **यात्राव्ययविवरणम् –**

प्रतिभागिभ्यः छात्रेभ्यः, मार्गनिर्देशकायाध्यापकाय च द्रितीयश्रेणी(Sleeper) रेलयानस्य गमनागमनयात्राव्ययः विश्वविद्यालयेन दीयते। तत्तद्विद्यासंस्थाधिकारिभिः रेलयानमूल्योगव्यवस्था

(Railway fare Concession) स्वीकरणीया इति सूच्यन्ते। रा.सं. विश्वविद्यालयेन तत्कालचीटिकायाः देयमूल्यं नैव प्रदास्यते।

अ) प्रतिभागिनां छात्राणामावासव्यवस्था रां.सं.विश्वविद्यालयेन कल्प्यते। आच्छादनशयनवस्त्रादिकं (Bed-sheet etc.) स्वयमेव आनयेयुः। तदवसरे तिरुपतिनगरस्य वायुः सुखदस्तथा स्थानीयं तापमानं 35-45 डिग्रीपरिमितं भवितुमर्हति।

आ) पञ्जीकरणार्थं सम्बद्धसंस्थाः पञ्जीकरणपत्राणि यथावत्प्रपूर्य निर्दिष्टदिनाङ्कं यावत् प्रेषयेयुः।

## विभिनस्पर्धानां निगमाः

### 1. शैक्षिकस्पर्धाः

सम्बद्धसंस्थाभ्यः आगतेषु त्रयोविंशतिच्छात्रेषु शैक्षिक-सांस्कृतिकस्य निर्दिष्टाः पञ्चदशच्छात्राः (15) तत्रापि अधिकाधिकम् अष्टौ छात्राः शैक्षिकस्पर्धासु भागं गृह्णीयुः। एकः छात्रः तिसृषु स्पर्धासु भागं ग्रहीतुमर्हति। यथा- एकः छात्रः भाषणे, अन्त्याक्षर्या, रसप्रश्ने च अथवा भाषणे समस्यापूर्तौ रसप्रश्ने च अथवा रसप्रश्ने अन्त्याक्षार्यां समस्यापूर्तौ च इति।

**(अ) शास्त्रभाषणस्पर्धाः-**

(क) शास्त्रभाषणस्पर्धायां भागग्राही छात्रः अधिकाधिकं शास्त्रद्वये भागं ग्रहीतुमर्हति।

(ख) परमेकस्य अनुष्ठानस्य द्वौ छात्रौ एकस्मिन्नेव शास्त्रे भागं ग्रहीतुं नार्हतः।

(ग) शास्त्रभाषणस्पर्धाविषयः २४ होराभ्यः पूर्वमेव उद्घोष्यते।

(घ) प्रतिच्छात्रं षण्णिमेषाः स्पर्धायां दीयन्ते, तत्र पञ्च निमेषाः भाषणाय, एकः निमेषः प्रश्नसमाधानाय च।

**(आ) अन्त्याक्षरी**

अस्यां स्पर्धायां सर्वे स्पर्धालवः भागं ग्रहीतुमर्हन्ति ।

**(इ) समस्यापूर्तिः**

अस्यां स्पर्धायां सर्वेऽपि भागं ग्रहीतुमर्हन्ति ।

**( छ) रसप्रश्नः(प्रश्नमञ्चः)/ Quiz**

एकस्मात् अनुष्ठानात् कावपि द्वौ छात्रौ एव भागं ग्रहीतुं शक्नुतः।

(रसप्रश्नाः वेद-वेदाङ्ग-पुराण-इतिहास-दर्शन-काव्येषु सामान्यज्ञाने च भविष्यन्ति।)

## 2. सांस्कृतिकस्पर्धाः

प्रत्यनुष्ठानं निर्दिष्टचतुर्दशस्पर्धालवोऽपि अत्र भागं ग्रहीतुमर्हन्ति। (क्रीडाप्रतिभागिनः विहाय)

### (१) संस्कृतगीतगानस्पर्धा (ललितसंगीतं, वैयक्तिकम्)

(अ) अत्र संस्कृतगीतानि यथा भजनं, कीर्तनं, स्वीयगीतं वा प्रस्तोतुं शक्यन्ते ।

(आ) चलनचित्रगानानि सर्वथा निषिद्धानि ।

(इ) प्रतिविश्वविद्यालयम् एक एका वा भागम् गृह्णीयात्। तत्र द्वावेव वाद्यसहकारार्थं भवितुमर्हतः। तयोः मार्गव्ययादिकं तत्तदनुष्ठानेन वोढव्यम्।

(ई) समयावधिः ५+१ निमेषाः।

### (२) एकपात्राभिनयस्पर्धा

(अ) दशनिमेषात्मकः समयः(8+2)।

(आ) भाषा तु संस्कृतमेव।

(इ) वेषभूषादिसज्जीकरणाय व्ययः स्वयमेय वोढव्यः।

(ई) एकेन एकया वा एकस्यैव पात्रस्य अभिनयः कर्त्तव्यः।

(उ) प्रतिभागिसमूह एकपात्राभिनयस्य सारसंग्रहं पूर्वमेव पञ्जीकरणपत्रेण सह दद्यात्। विलम्बेन प्रेषितः नाङ्गीकरिष्यते।

(ऊ) प्रतिविद्यालयम् एकः / एका वा भागं ग्रहीतुमर्हति।

### (३) एकाङ्किकाभिनयस्पर्धा

(अ) एकः समूहः एकामेव एकाङ्किकां प्रदर्शयेत्।

(आ) एकाङ्किकाप्रदर्शनकालः त्रिंशन्निमेषा(25+5) । कदापि निश्चितसमयः नातिक्रमणीयः।

(इ) पात्रधारिणः दशाधिकाः न भवेयुः।

(ई) वस्त्राभूषणादिव्यवस्था स्वयमेव कार्या।

(उ) एकाङ्किकाः पौराणिकं, प्राचीनम्,आधुनिकं वा विषयमवलम्ब्य संस्कृतभाषयैव निबद्धाःभवेयुः।

(ऊ) प्रतिभागिसमूहेन तस्याः एकाङ्किकायाः सारसंग्रहः पञ्जीकरणपत्रेण सहैव समर्पणीयः। विलम्बेन प्रेषितः नाङ्गीकरिष्यते।

### (४) जानपदनृत्यस्पर्धा (लोकनृत्यस्पर्धा)

(अ) प्रतिसमूहमेकमेव नृत्यं प्रदर्शनीयम्।

(आ) अधिकाधिकाः दशच्छात्राःभवेयुः।

(इ) आहार्याभिनयव्यवस्था प्रतिभागिभिः स्वयमेव स्वीयव्ययेनैव कार्या।

(ई) नृत्यस्य गीतं संस्कृतेनैव निबद्धं भवेत् ।

(उ) चलनचित्रगीतानि तेषाम् अनुकरणानि वा न भवेयुरेव ।

(ऊ) प्रतिभागिनः सङ्गीतोपकरणानि ध्वनिमुद्रिकादीनि च उपयोक्तुं शक्नुवन्ति । किन्तु तानि स्वयमेव आनेतव्यानि ।

(ऋ) स्पर्धायाः समयः दशनिमेषात्मक एव ।

**(५) संस्कृतप्राविधिकस्पर्धा**

संस्कृतेन निबद्धम् एकाङ्कनाटकं, कथा, गीतं, सम्भाषणं, सन्दर्भविशेषः एतेषु यं कमपि आधृत्य Graphics / Animation द्वारा निर्मितं पञ्चनिमेषावधिकं रूपकम् अस्याः स्पर्धायाः विषयः । येषाम् अनुष्ठानानां पूर्वोक्तविषयक Graphics / Animation उत्कृष्टं भवति, तेभ्यः पुरस्काराः दास्यन्ते । इत्थं रूपकस्य गुणस्तरमाधृत्य प्रथम-द्वितीय-तृतीयपुरस्काराः प्रदास्यन्ते । उत्कृष्टं रूपकं सभायां प्रदर्शयिष्यते । भवद्भिः Graphics/Animation सान्द्रमुद्रिकायां Pendrive मध्ये वा सङ्कलय्य 20.03.2023 दिनाङ्के संयोजकाय अर्पणीयं तथा ई-मेल्द्वारा अपि प्रेषणीयम् । अस्मदीयः ई-मेल्सङ्केतः (**vagvardhiniparishad@nsktu.org**)भवद्भिः रूपकस्य प्राविधकी (Animation) स्वीयधनव्ययेनैव परिकल्पनीया ।

## 3. क्रीडास्पर्धाः

**(1) युगल-वैद्मिण्टन् कीडास्पर्धा**

(अ) प्रत्येकं संस्कृतमहाविद्यालयात् / संस्थायाः । विश्वविद्यालयात् कीडाकार्यक्रमेभ्यः बालकानां/बालिकानां कृते नामाङ्कनद्वयमेव अनुमन्यते । संस्कृतमेव प्राधान्यतः पठन्तः स्नातक-स्नातकोत्तरच्छात्राः अत्र अर्हाः,नेतराः ।

(आ) संस्कृतविश्वविद्यालयान् विहाय इतरविश्वविद्यालयेभ्यः नामाङ्कनं न स्वीक्रियते ।

(इ) केवलं Non-Marking Shoes इत्यस्य अनुमतिः भविष्यति । यः कोऽपि कीडकः एतत् न अनुसरति चेत्, सः भार्ग ग्रहीतुं न अर्हति ।

(ई) प्रतियोगितायां Yonex Mavis-350 अथवा Mavis-600 शटल्-उपकरणस्यैव उपयोगः भविष्यति ।

(उ) नूतन-बी.ए.ऐ-नियमानुसारं प्रतियोगिता भविष्यति ।

(ऊ) आयोजकः आवश्यकतानुसारं प्रतियोगितासु आयोजनस्थले च अपेक्षितं परिवर्तनं कर्तुम् अधिकारवान् भवति, तदीयः निर्णय एवं अन्तिमः भवति, प्रतिभागिदलैः च सः अङ्गीकरणीयः भविष्यति ।

(ऋ) क्रीडकैः स्वक्रीडारम्भात् पूर्वं न्यूनातिन्यूनं विंशतिनिमेषपूर्वम् उपस्थातव्यम्।

(लृ) रैकेट्-साधनस्य दुरुपयोगः निषिद्धः अस्ति। क्रीडकद्वारा यदि क्रीडाङ्गणस्य काऽपि क्षतिः भवति, तर्हि सः न्यायोचितं दण्डनम् अर्हति।

(ए) स्व-स्व-संस्थायाः दलप्रबन्धकाः /मार्गदर्शकाः स्वक्रीडकानां व्यवहाराणाम् उत्तरदायिनः भवन्ति।

(ऐ) काष्टाङ्गणेषु क्रीडाः सञ्चालयिष्यन्ते।

(ओ) क्रीडकाः सम्यक् वेषसंहिता पालयेयुः।

(औ) क्रीडयाः स्वस्य बैङ्गिण्टन्-साधनं, पादत्राणानि च आनयेयुः ।

(अं) कीडायाः समयसूच्यादिकं विश्वविद्यालयस्य जालपुटे समये समये संस्थाप्यते।

स्वकीयसंस्थायाः स्वीकृतिपत्रम् आगमनस्य निश्चयश्य 07.03.2024 दिनाद्वात् पूर्वप्रदत्त इ-मेलद्वारा सूचयन्तु।

## 4. योगासनानां स्पर्धाः

**1. क भागः - अनिवार्य-आसनानि(बालकबालिकानां कृते)**

(अ) यौगिकसूर्यनमस्काराः (17 सोपानानि)

(आ) मत्स्येन्द्रासनम्।

(इ) पूर्णधनुरासनम् ।

(ई) पिण्डासनम्।

(उ) शीर्षासनम्।

**2. ख भागः (वैकल्पिक योगासनानि – केषाञ्चन चतुर्णाम् आसनानां चयनम् )**

**बालकानां कृते**

(अ) टिट्टिभासनम्।

(आ) परिवृत्तपार्श्वकोणासनम्।

(इ) पूर्णचक्रासनम्।

(ई) राजकपोतासनम्।

(उ) मरीचासनम् - 3।

(ऊ) द्विपादशीर्षासनम्।

(ए) हनुमानासनम्।

(ऐ) वृश्चिकासनम्।

**बालिकानां कृते**

(अ) टिट्टिभासनम्।

(आ) परिवृत्तपार्श्वकोणासनम्।

(इ) अर्धबद्धपद्मोत्थानासनम्।

(ई) कपोतासनम् ।

(उ) मरीचासनम् - 3।

(ऊ) द्विपादशीर्षासनम्।

(ए) योगनिद्रासनम्।

(ऐ) वृश्चिकासनम्।

1.प्रतिभागिनां प्रत्येकं योगासनं निम्नलिखितरूपेण पूर्णस्थितौ परिगण्यते।

2. प्रत्येकं अनिवार्य-आसनस्य कृते एकं निमेषम्। सूर्यनमस्कारस्य एकः परिक्रमः (सप्तदशगणना)।

3. प्रत्येकं वैकल्पिक-आसनस्य कृते एकं निमेषम्।

4. सूर्य नमस्कारं मिलित्वा करणीयम्, अन्यानि योगासनानि प्रत्येकं दलस्य सदस्येन व्यक्तिगतरूपेण करणीयम्।

5. मौखिकी परीक्षा - आसनस्य अर्थः, लाभाः एवं सम्बन्धितः सन्दर्भश्लोकः हठयोगग्रन्थस्यानुगुणम्।

6. **क** एवं **ख** भागयोः च अङ्कानि अधः दत्तानि -

| | |
|---|---|
| पञ्च अनिवार्यासनानि (भागः क) | - 50 अङ्काः |
| चत्वारि वैकल्पिक-आसनानि(भागः ख) | - 40 अङ्काः |
| मौखिकी परीक्षा | - 10 अङ्काः |
| **आहत्य अङ्काः** | **- 100 अङ्काः** |

**स्वीकृतिपत्रं तु 07 मार्च 2024 दिनाङ्कात् पूर्वम् ई-मेल्द्वारा प्रेषणीयम्।**
**अस्मदीयः ई-मेल्सङ्केतः vagvardhiniparishad@nsktu.org**

रां. सं. विश्वविद्यालयस्य (nsktu.ac.in) जालपुटे अन्तर्जालमाध्यमेन पञ्जीकरणार्थं संपर्कसूत्रं प्रदत्तमस्ति। सर्वे कृपया संपर्कसूत्रद्वारा स्वकीयसंस्थागतछात्राणां पञ्जीकरणं कुर्वन्त्विति संसूच्यन्ते। अपि च नियमावल्या सह प्रदत्तपञ्जीकरणपत्रम् पृथक्-पूरयित्वा EMS/*Speed* Post द्वारा अधोनिर्दिष्टसङ्केतं प्रति प्रेषयेयुः।

स्पर्धाविषये या काऽपि जिज्ञासा तथा वार्ताप्राप्तिसूचना च अधोनिर्दिष्टसङ्केतमाध्यमेन विधातव्या।

*****

डॉ.एम्. जि. नन्दनरावः
संयोजकः
वाग्वर्धिनीपरिषद्
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र - 517507
चलद्वाणी - 8500563074

डॉ. एम्. दत्तात्रेय शर्मा
सहसंयोजकः
वाग्वर्धिनीपरिषद्
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र – 517507
चलवाणी – 6303557418

आचार्याः रमाश्री
कुलसचिवा
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र - 517507
दूरभाषा- 0877-2286799
Fax No. **0877-2287809**
Website: http://www.nsktu.ac.in

धन्यवादपुरस्सरम्

भवदीया
19/2/25
कुलसचिवा